# Vyasaproktam Ashvashira Stotram

# વ્યાસપ્રોક્તં અશ્વશિરાસ્તોત્રમ્

## Document Information

Text title : Vyasaproktam Ashvashira Stotram

File name : vyAsaproktaMashvashirAstotram.itx

Category : deities_misc, mahAbhArata, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 335/73-89||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 15, 2025

*sanskritdocuments.org*

# વ્યાસપ્રોક્તં અશ્વશિરાસ્તોત્રમ્

એતદ્ધયશિરો રાજન્નાખ્યાનં તવ કીર્તિતમ્ ।
પુરાણં વેદસમિતં યન્માં ત્વં પરિપૃચ્છસિ ॥ ૭૨॥

યાં યામિચ્છેત્તનું દેવઃ કર્તું કાર્યવિધૌ ક્વચિત્ ।
તાં તાં કુર્યાદ્વિકુર્વાણઃ સ્વયમાત્માનમાત્મના ॥ ૭૩॥

એષ વેદનિધિઃ શ્રીમાનેષ વૈ તપસો નિધિઃ ।
એષ યોગશ્ચ સાઙ્ખ્યં ચ બ્રહ્મ ચાગ્ર્યં હરિર્વિભુઃ ॥ ૭૪॥

નારાયણપરા વેદા યજ્ઞા નારાયણાત્મકાઃ ।
તપો નારાયણપરં નારાયણપરા ગતિઃ ॥ ૭૫॥

નારાયણપરં સત્યમૃતં નારાયણાત્મકમ્ ।
નારાયણપરો ધર્મઃ પુનરાવૃત્તિદુર્લભઃ ॥ ૭૬॥

પ્રવૃત્તિલક્ષણશ્ચૈવ ધર્મો નારાયણાત્મકઃ ।
નારાયણાત્મકો ગન્ધો ભૂમૌ શ્રેષ્ઠતમઃ સ્મૃતઃ ॥ ૭૭॥

અપાં ચૈવ ગુણો રાજન્ રસો નારાયણાત્મકઃ ।
જ્યોતિષાં ચ ગુણો રૂપં સ્મૃતં નારાયણાત્મકમ્ ॥ ૭૮॥

નારાયણાત્મકશ્ચાપિ સ્પર્શો વાયુગુણઃ સ્મૃતઃ ।
નારાયણાત્મકશ્ચાપિ શબ્દ આકાશસમ્ભવઃ ॥ ૭૯॥

મનશ્ચાપિ તતો ભૂતમવ્યક્તગુણલક્ષણમ્ ।
નારાયણપરઃ કાલો જ્યોતિષામયનં ચ યત્ ॥ ૮૦॥

નારાયણપરા કીર્તિઃ શ્રીશ્ચ લક્ષ્મીશ્ચ દેવતાઃ ।
નારાયણપરં સાઙ્ખ્યં યોગો નારાયણાત્મકઃ ॥ ૮૧॥

કારણં પુરુષો યેષાં પ્રધાનં ચાપિ કારણમ્ ।
સ્વભાવશ્ચૈવ કર્માણિ દૈવં યેષાં ચ કારણમ્ ॥ ૮૨॥

પઞ્ચકારણસઙ્ખ્યાતો નિષ્ઠા સર્વત્ર વૈ હરિઃ ।
તત્ત્વં જિજ્ઞાસમાનાનાં હેતુભિઃ સર્વતોમુખૈઃ ॥ ૮૩॥

તત્ત્વમેકો મહાયોગી હરિર્નારાયણઃ પ્રભુઃ ।
સબ્રહ્મકાનાં લોકાનામૃષીણાં ચ મહાત્મનામ્ ॥ ૮૪॥

સાઙ્ખ્યાનાં યોગિનાં ચાપિ યતીનામાત્મવેદિનામ્ ।
મનીષિતં વિજાનાતિ કેશવો ન તુ તસ્ય તે ॥ ૮૫॥

યે કેચિત્સર્વલોકેષુ દૈવં પિત્ર્યં ચ કુર્વતે ।
દાનાનિ ચ પ્રયચ્છન્તિ તપ્યન્તિ ચ તપો મહત્ ॥ ૮૬॥

સર્વેષામાશ્રયો વિષ્ણુરૈશ્વરં વિધિમાસ્થિતઃ ।
સર્વભૂતકૃતાવાસો વાસુદેવેતિ ચોચ્યતે ॥ ૮૭॥

અયં હિ નિત્યઃ પરમો મહર્ષિર્મહાવિભૂતિર્ગુણવાન્નિર્ગુણાખ્યઃ ।
ગુણૈશ્ચ સંયોગમુપૈતિ શીઘ્રં કાલો યથર્તાવૃતુસમ્પ્રયુક્તઃ ॥ ૮૮॥

નૈવાસ્ય વિન્દન્તિ ગતિં મહાત્મનો ન ચાગતિં કશ્ચિદિહાનુપશ્યતિ ।
જ્ઞાનાત્મકાઃ સંયમિનો મહર્ષયઃ પશ્યન્તિ નિત્યં પુરુષં ગુણાધિકમ્ ॥ ૮૯॥

ઇતિ મહાભારતે શાન્તરપર્વણિ ૩૩૫ અધ્યાયાન્તર્ગતં
વ્યાસપ્રોક્તં અશ્વશિરાસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૩૩૫/૭૩-૮૯॥

mahAbhArata . shAntiparva . adhyAya 335/73-89..

Proofread by PSA Easwaran

*Vyasaproktam Ashvashira Stotram*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*